!! श्री हरिः !!

अक्षातिहारी संस्कृत महाविद्यालयः, रहीमपुरः, खगड़िया
अङ्गीभूत
कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालयः, दरभंगा।
शास्त्री-प्रतिष्ठा,
विषयः- साहित्यम् ~~द्वितीयो~~
खण्डः प्रथमः, अनिवार्य
प्रथम-पत्रम्, अनिवार्य संस्कृत
व्याकरणम्।

लघुसिद्धान्तकौमुदी · संज्ञाप्रकरणम्

समाहारः स्वरितः- १।२।३१॥

उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्। स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा।

प्रस्तुतसूत्रमिदं पाणिनेरष्टाध्यायीग्रन्थस्य प्रथमाध्यायस्य द्वितीयपादान्तर्गतमेकत्रिंशत् क्रमाद्धृरितमस्ति। अत्र समाहारः' प्रथमान्तपदं 'स्वरितः' इति प्रथमान्तपदं, (द्विती) द्विपदात्मकमिदं सूत्रम्। पूर्वोक्ताभ्यां सूत्राभ्यां उदात्तानुदात्तौ अनुवर्तेते, उपदेशेऽजनुनासिक इत्' इत्यतः अजिति अनुवर्तते।

उदात्तवर्णधर्मः, अनुदात्तवर्णधर्मश्च समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञको भवति। सोऽच् ह्रस्वोदात्त, ह्रस्वानुदात्त, ह्रस्वस्वरित- दीर्घोदात्त, दीर्घानुदात्त- दीर्घस्वरित एवं प्लुतोदात्त- प्लुतानुदात्त- प्लुतस्वरितभेदेन नवविधोऽपि अनुनासिकानुनासिक भेदेन द्विधा भवतः द्वाभ्यां प्रकाराभ्यां वर्तते इत्यर्थः तदेवमनुनासिका नव अचः, अननुनासिकाश्च नवेत्याष्टादशविधत्वमेकैकस्याच् इति स्थितम्।

मुखनासिकावचनोऽनुनासिकः -१।१।८।।

प्रस्तुतमिदं सूत्रं पाणिनि अष्टाध्यायीग्रन्थस्य प्रथमाध्यायस्य प्रथमपादान्तर्गतं अष्टमसूत्रादुद्धरितमस्ति।

(भट्टोजि) वरदराजाचार्यः स्ववृत्तौ लिखति- मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश तेषां ह्रस्वाभावात्।

अत्र मुखेन सहिता मुखसहिता, मुखसहिता चासौ नासिका चेति मुखनासिका, शाकपार्थिवादित्वात् सहितपदस्य लोप, उच्यते-उच्चार्यतेऽसौ वचनः, मुखनासिकया उच्यते वचनः मुखनासिकावचनः। एवं मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिक संज्ञको भवति इति फलितार्थः।

तदित्थम् - अ, इ, उ, ऋ वर्णानां प्रत्येकमष्टादश भेदाः स्वीकृताः। लृवर्ण द्वादश- तस्य दीर्घाभावात् - तथा च उदात्तलृकारदीर्घः, अनुदात्तलृकारदीर्घः, स्वरितलृकारदीर्घः, ते च अनुनासिकास्त्रयः, अननुनासिकास्त्रयः - इति षड्भेदानामभावे सति ह्रस्वप्लुतप्रपञ्चश्च षड्विध इति लृकारस्य द्वादशविधत्वमेवेति भावः।

एचामपि द्वादश तेषां ह्रस्वाभावात् - एवञ्च ह्रस्वप्रपञ्चषड्भेदाभावाद् द्वादशविधत्वमेवैचामिति भावः।

डॉ० अवधेशकुमार शर्मा
सहायकप्राचार्यः, व्याकरणम्,
अवधबिहारीसंस्कृतमहाविद्यालयः